अथ

गिरीशस्तोत्र-शिवस्तुति-

प्रारम्भः

खेमराज श्रीकृष्णदास प्रकाशन बम्बई

संवत् २०४६, सन् १९८९

सूची मूल्य 52/00 रुपये मात्र

मुद्रक व प्रकाशक—
खेमराज श्रीकृष्णदास,
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
बम्बई—४०० ००४ के लिए
दे. स. शर्मा मैनेजर द्वारा
श्रीवेंकटेश्वर प्रेस, खेतवाड़ी, बम्बई ४ में मुद्रित,

श्रीगणेशायनमः॥ शिरोगाङ्गवासं जटाजूट-
भासं मनोजादिनाशं सदादिग्विकासम्॥ हरं
चाम्बिकेशं शिवेशं महेशं शिवं चन्द्रभालं
गिरीशं प्रणौमि ॥ १ ॥ सदाविघ्नदारं गले
नागहारं मनोजप्रहारं तनौभस्मभारम् ॥
महापापहारं प्रभुंकान्तिधारं शिवं चन्द्रभालं

---

१ शिवांगः ईशः। २ दृविदारणे।

३ डुभृञ् धारणपोषणयोः। ४ हृञ् हरणे।

गिरीशं प्रणौमि ॥२॥ शिवं विश्वनाथं प्रभुं
भूतनाथं सुरेशादिनाथं जगन्नाथनाथम् ॥
रतीनाथनाशंकरं देवनाथं शिवं च चन्द्रभालं
गिरीशं प्रणौमि ॥ ३ ॥ धनेशादितोषं[१] सदा
शत्रुकोषं[२] महामोहशोषं[३] जनान्नित्यपोषम्[४] ॥
महालोभरोषं[५] शिवानित्यजोषं[६] शिवं चन्द्रभालं

---

१ तुषप्रीतौ । २ कुषहिंसायाम् । ३ शुषशोषे । ४ पुषपुष्टौ ।
५ रुषहिंसायाम् । ६ जुषीप्रीतिसेवनयोः ।

गिरीशं प्रणौमि ॥४॥ ललाटे च बालं शिवं
दुष्टकालं सदाभक्तपालं दधानंकपालम् ॥
महाकालकालस्वरूपंकरालं शिवंचन्द्रभालं
गिरीशं प्रणौमि ॥ ५ ॥ परब्रह्मरूपं विचित्र
स्वरूपं सुराणां सु भूपं महाशान्तरूपम् ॥
गिरीन्द्रात्मजासंगृहीतार्द्धरूपं शिवंचंद्रभालं
गिरीशंप्रणौमि ॥६॥ सदागङ्गपानंसुमोक्षादि
दानं स्वभक्तादिमानंप्रभुंसर्वज्ञानम् ॥ डमरुं

त्रिशूलं कराभ्यांदधानं शिवं चन्द्रभालं गिरीशंप्रणौमि॥७॥अजिनादिगोहंरतीनाथ-मोहं सदाशत्रुद्रोहं शिवंनिर्विमोहम् ॥ विभुं सर्वकालेश्वरं कामद्रोहंशिवंचन्द्रभालं गिरीशं प्रणौमि ॥ ८ ॥ द्विजन्मानुसेवंप्रभुंदेवदेवं सदाभूतसेवंगणेशादिदेवम् ॥ पतङ्गादिदेवं हिरण्यादिदेवं शिवंचन्द्रभालं गिरीशंप्रणौमि

---

१ गुहूसंवरणे । २ द्रुहजिघांसायाम् ।

॥ ९ ॥ अदेवप्रमारं[1] शिवंसर्वसारं[2] नाराणां
विभारं[3] गणेशादिपारम्[4] ॥ महारोषहारं[5]
ह्यलङ्कारधारं शिवंचन्द्रभालं गिरीशंप्रणौमि
॥ १० ॥ नरोयस्त्रिकालेपठेद्भक्तियुक्तः शिवं
प्राप्यसद्यस्त्रिलोकेप्रसिद्धम् ॥ धनंधान्यपुत्रं

---

१ मृङ्प्राणत्यागे । २ सृ गतौ । ३ डुभृञ्धारणपोषणयोः ।
४ वृषालंणे । ५ हृञ्हरणे ।

कुटुम्बादियुक्तं समासाद्यमित्रंसुमुक्तिंव्रजेत्सः ॥ ११ ॥

इति श्रीमिश्रकुंजविहारिणाकृतं
गिरीशस्तोत्रं समाप्तम् ।
शुभं भूयात् ।

विज्ञप्ति ।

विदित हो कि कान्यकुब्जमें उत्पन्न जगन्नाथात्मज कुंजविहारीने इस गिरीशस्तोत्रको बनाकर प्रसिद्ध किया और कुंजविहारीके पिताका नाम हरिचरणमिश्र जिन्होंने देहलीते पांच कोश पर ग्राम हलोर है तहां पर श्रीमृत्युंजय शास्त्री रहते

जहांकी चंद्रिका अबतक प्रसिद्ध है तहांपर भेजकर अध्ययन कराया है रहनेवाले जिला रायबरेली ग्राम देहलीमें निवास ॥

श्रीगणेशाय नमः ॥ ॥ श्रीविश्वेश्वराय नमः ॥
ॐ ॥ जय गङ्गाधर जय गिरिजाधीश ॥ हर
जय गिरीजाधीश ॥ त्वं माम्पालय नित्यं
कृपया जगदीश ॥ हरहरहरमहादेव ॥ १ ॥
कैलासे गिरिशिखरे कल्पद्रुमविपिने। गुञ्जति
मधुकरपुञ्जे कुञ्जवने गहने॥ कोकिल कूजति
खेलति हंसा वन ललिता । रचयति
कलाकलापं नृत्यति मुदसहिता ॥ हरहरहर

महादेव ॥ २ ॥ तस्मिन्सुललितदेशे
मालामणिरचिता ॥ तन्मध्ये हरनिकटे
गौरीमुदसहिता ॥ हरहरहरमहादेव ॥ ३ ॥
क्रीडारचयति भूषा अम्बर अतिमीशम् ॥
इन्द्रादिक सुर सेवित प्रणमति ते शीशम् ॥
हरहरहरमहादेव ॥४॥ विबुधवधू बहुनृत्यति
हृदये मुदसहिता ॥ किन्नर गानं कुरुते सप्त
स्वरसहिता॥ हरहरहरमहादेव॥५॥ धिनधिन

कथयति धिद्धि मृदंगं वादयते ॥ क्कणक्कण
ललितावेणुं मधुरंनादरंनादयते ॥ हरहरहर
महादेव ॥ ६ ॥ रणुरणुरचयति नूपुरमुज्ज्व-
लिता॥ चक्रावर्तीभ्रमयति कुरुते तांधिक्काम्॥
हरहरहरमहादेव ॥ ७ ॥ तांतां लुप्चुप्तालं
नादयते ॥ अंगुष्ठांगुलिनादं लास्यगतं
कुरुते॥ हरहरहरमहादेव॥८॥ कर्पूरद्युतिगौरं
पंचाननसहितम् ॥ त्रिनयन शशिधरमौले

विषधरकंठयुतम् ॥ हरहरहरमहादेव ॥ ९ ॥
सुंदरजटाकलापं पावकयुतभालम् ॥ डमरु
त्रिशूलकपालं करधृतमृगहारम् ॥ हरहरहर
महादेव ॥ १० ॥ शंखनिनादं कृत्वा झलरीं
नादयते ॥ नीराजयते ब्रह्मा वेद चतुःपठते ॥
हरहरहरमहादेव ॥ ११ ॥ इहमृदुचरणसरोजं
हृदिकमले धृत्वा ॥ अवलोकयति महेशं
अभिनत्वा ॥ हरहरहरमहादेव ॥ १२ ॥

रुंडै रचिता उरमाला पन्नगउपवीतम् ॥ वाम विभागेगिरिजारूपं अतिललितम् ॥ हरहरहर महादेव ॥ १३ ॥ सकलशरीरे मनसिजकृत भस्माभरणं ॥ इति वृषभध्वजरूपं तापत्रय-हरणम् ॥ हरहरहरमहादेव ॥ १४ ॥ ध्यानं आरतिसमयेअतिभूत्वा रामात्रिजटानाथं ॥ ईशं अभिनत्वा ॥ हरहरहरमहादेव ॥ १५ ॥ संध्यात्रितयं प्रतिदिन पठनं यः कुरुते ॥

शिवसायुज्यं गच्छति भक्त्या यः शृणुते ॥ हरहरहरमहादेव ॥११॥ इति श्रीशिवस्तुतिः समाप्ता ॥ ॥

हमारी सभी पुस्तकें मिलने के स्थान :–

१. खेमराज श्रीकृष्णदास, श्रीवेंकटेश्वर प्रेस, खेमराज श्रीकृष्णदास मार्ग, सातवीं खेतवाड़ी, खम्बाटा लेन, बम्बई–४०० ००४.

२. गंगाविष्णु श्रीकृष्णदास, लक्ष्मीवेंकटेश्वर स्टीम् प्रेस व बुकडिपो, अहिल्याबाई चौक, कल्याण जि. ठाणे (महाराष्ट्र)

३. खेमराज श्रीकृष्णदास चौक, वाराणसी (उ. प्र.)